With Humble Pranams

To

Sri U.Ve. Mukkur Lakshmi Narasimhachariyar Swamy

Taittirīya-Saṃhitā

Edited by Vijayaraghavan Bashyam

Book 1, Chapter 5

कृष्ण यजुर्वेदीया तैत्तिरीय संहिता,

प्रथमं काण्डम्, पञ्चमः प्रपाठकः

पुनराधानम्   अग्निर्ऋषिः।

हरिः ॐ

[[1-5-1]]

पुनराधानविधानम्॥

[[1-5-1-1]]

दे॒वा॒सु॒राः संय॑त्ता आस॒न्ते दे॒वा वि॑ज॒यमु॑प॒यन्तो॒ ऽग्नौ वा॒मं वसु॒ सं न्य॑दधत॒।

इ॒दमु॑ नो भवि॒ष्यति॒ यदि॑ नो जे॒ष्यन्तीति॒

तद॒ग्निर्न्य॑कामयत॒ तेनापा॑क्राम॒त्

तद्दे॒वा वि॒जित्या॑व॒रुरु॑त्समाना॒ अन्वा॑य॒न्तद॑स्य॒ सह॒सा ऽदि॑त्सन्त॒

सो॑ ऽरोदी॒द्यदरो॑दी॒त्तद्रु॒द्रस्य॑ रुद्र॒त्वम्।

यदश्र्व॑शीय॒त तत्॥

[[1-5-1-2]]

र॑ज॒तꣳ हिर॑ण्यमभवत् तस्मा॑द्रज॒तꣳ हिर॑ण्यमदक्षि॒ण्यम॑श्रु॒जꣳ हि

यो ब॒र्हिषि॒ ददा॑ति पु॒राऽस्य॑ संवत्स॒राद्गृ॒हे रु॑दन्ति॒ तस्मा॑द्ब॒र्हिषि॒ न दे॒यम्।

सो॑ ऽग्निर॑ब्रवीद्भा॒ग्य॑सा॒न्यथ॑ व इ॒दमिति॑ पुनरा॒धेयं॑ ते॒ केव॑ल॒मित्य॑ब्रुवन्नृ॒भ्नव॒त् खलु॒ स इत्य॑ब्रवी॒द्यो मद्दे॑वत्य॑म॒ग्निमा॒दधा॑ता॒ इति॒

तं पू॒षाऽऽध॑त्त तेन॑॥

[[1-5-1-3]]

पू॒षाऽऽर्ध्नो॑त् तस्मा॑त् पौ॑ष्णाः प॒शव॑ उच्यन्ते॒ तं त्वष्टाऽऽध॑त्त तेन॒ त्वष्टा॑ऽऽर्ध्नो॑त् तस्मा॑त् त्वा॒ष्ट्राः प॒शव॑ उच्यन्ते॒

तं मनु॒राऽध॑त्त तेन॒ मनु॑रा॒र्ध्नो॑त् तस्मा॑न्मान॒व्यः॑ प्र॒जा उ॑च्यन्ते॒

तं धा॒ताऽऽध॑त्त तेन॑ धा॒ताऽऽर्ध्नो॑त् संवत्स॒रो वै धा॒ता तस्मा॑त् संवत्स॒रं प्र॒जाः प॒शवोऽनु॒ प्र जा॑यन्ते॒। य ए॒वं पु॑नरा॒धेय॑स्य॒र्द्धिं वेद॒॥

[[1-5-1-4]]

ऋ॒ध्नोत्ये॒व यो॑ ऽस्यै॒वं ब॒न्धुतां॒ वेद॒ बन्धु॑मान् भवति।

भाग॒धेयं॒ वा अ॒ग्निराहि॑त इ॒च्छमा॑नः प्र॒जां प॒शून् यज॑मान॒स्योप॑ दोद्राव॒।

उ॒द्वास्य॒ पुन॒रा द॑धीत भाग॒धेये॑नै॒वैन॒ꣳ॒ सम॑र्धयत्यथो॒ शान्ति॑रि॒वास्यै॒षा

पुन॑र्वस्वो॒रा द॑धीतै॒तद्वै पुन॑रा॒धेय॑स्य॒ नक्ष॑त्रं॒ यत्पुन॑र्वसू॒ स्वाया॑मे॒वैनं॑ दे॒वता॑यामा॒धाय॑ ब्रह्मवर्च॒सी भ॑वति

द॒र्भैः
[[1-5-1-5]]
आ द॑धा॒त्यया॑तयामत्वाय

द॒र्भैरा द॑धात्य॒द्भ्य ए॒वैन॒मोष॑धीभ्यो ऽव॒रुध्याऽऽध॑त्ते

पञ्च॑कपालः पु॒रो॒डाशो॑ भवति॒ पञ्च॒ वा ऋ॒तव॑ ऋ॒तुभ्य॑ ए॒वैन॑मव॒रुध्याऽऽध॑त्ते॥
[[1-5-2]]
याज्याद्यङ्गजातविधानम्। अग्निर्ऋषिः।
[[1-5-2-1]]
परा॒ वा ए॒ष य॒ज्ञं प॒शून् व॑पति॒ यो॑ ऽग्निमु॑द्वा॒सय॑ते।

पञ्च॑कपालः पु॒रो॒डाशो॑ भवति॒

पाङ्क्तो॑ य॒ज्ञः पाङ्क्ताः॑ प॒शवो॑ य॒ज्ञमे॒व प॒शून॑वरुन्धे।

वी॒र॒हा वा ए॒ष दे॒वानां॑ यो ऽग्निमु॑द्वा॒सय॑ते

न वा ए॒तस्य॑ ब्राह्म॒णा ऋ॑ता॒यवः॑ पु॒राऽऽन्न॑मक्षन्।

प॒ङ्क्त्यो॑ याज्यानुवा॒क्या॑ भवन्ति॒

पाङ्क्तो॑ य॒ज्ञः पाङ्क्तः॒ पुरु॑षो दे॒वाने॒व वी॒रं नि॑रव॒दाया॒ग्निं पुन॒रा॥
[[1-5-2-2]]
ध॑त्ते

श॒ताक्ष॑रा भवन्ति श॒तायुः॒ पुरु॑षः श॒तेन्द्रि॑य॒ आयु॑ष्ये॒वेन्द्रि॒ये प्रति॑ तिष्ठति॒

यद्वा अ॒ग्निराहि॑तो॒ नर्ध्य॑ते॒ ज्यायो॑ भाग॒धेयं॑ निका॒मय॑मानो॒ यदा॑ग्ने॒यꣳ॒ सर्वं॒ भव॑ति॒ सैवास्यर्द्धिः॒

सं वा ए॒तस्य॑ गृ॒हे वाक् सृ॒ज्यते॒ यो॑ ऽग्निमु॑द्वा॒सय॑ते॒ स वाच॒ꣳ॒ सꣳसृ॑ष्टां॒ यज॑मान ईश्व॒रो ऽनु॒ परा॑भवितो॒र्विभ॑क्तयो भवन्ति

वा॒चो विधृ॑त्यै॒ यज॑मान॒स्यापरा॑भावाय॒॥
[[1-5-2-3]]
विभ॑क्तिं करोति॒ ब्रह्मै॒व तद॑कर्।

उपा॒ꣳ॒शु यज॑ति॒ यथा॑ वा॒मं वसु॑ विविदा॒नो गूह॑ति ता॒दृगे॒व तद॒ग्निं प्रति॑ स्विष्ट॒कृतं॑ निरा॑ह॒ यथा॑ वा॒मं वसु॑ विविदा॒नः

प्र॑का॒शं जिग॑मिषति ता॒दृगे॒व तत्।

विभ॑क्तिमु॒क्त्वा प्र॑या॒जेन॒ वष॑ट् करोत्या॒यत॑नादे॒वनैति॒

यज॑मानो॒ वै पु॑रो॒डाशः॑ प॒शव॑ ए॒ते आहु॑ती॒ यद॒भितः॑ पुरो॒डाश॑मे॒ते आहु॑ती॥

[[1-5-2-4]]

जुहोति यजमानमेवोभयतः पशुभिः परि गृह्णाति

कृतयजुः संभृतसम्भार इत्याहुर्न संभृत्याः संभारा न यजुः कर्तव्यमिति।

अथो खलु संभृत्या एव संभाराः कर्तव्यं यजुर्यज्ञस्य समृद्ध्यै

पुनर्निष्कृतो रथो दक्षिणा पुनरुत्स्यूतं वासः पुनरुत्सृष्टो ऽनड्वान् पुनराधेयस्य समृद्ध्यै

सप्त ते अग्ने समिधः सप्त जिह्वा इत्यग्निहोत्रं जुहोति

यत्रयत्रैवास्य न्यक्तं ततः॥

[[1-5-2-5]]

एवैनमव रुन्धे

वीरहा वा एष देवानां यो ऽग्निमुद्वासयते तस्य वरुण एवर्णयादाग्निवारुणमेकादशकपालमनु निर्वपेद्यं चैव हन्ति

यश्चास्यर्णयात्तौ भागधेयेन प्रीणाति नाऽऽर्तिमार्च्छति यजमानः॥

[[1-5-3]]

पुनराधानमन्त्राः॥ अग्निर्ऋषिः।

[[1-5-3-1]]

भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा। उपस्थे ते देव्यदिते ऽग्निमन्नादमन्नाद्यायाऽऽ दधे॥

आऽयं गौः पृश्निरक्रमीदसनन्मातरं पुनः। पितरं च प्रयन्त्सुवः॥

त्रिꣳशद्धाम वि राजति वाक्पतङ्गाय शिश्रिये। प्रत्यस्य वह द्युभिः॥

अस्य प्राणादपानत्यन्तश्चरति रोचना। व्यख्यन्महिषः सुवः॥

यत्त्वा॥

[[1-5-3-2]]

क्रुद्धः परोवप मन्युना यदवर्त्या। सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि॥

यत्ते मन्युपरोप्तस्य पृथिवीमनु दध्वसे। आदित्या विश्वे तद्देवा वसवश्च समाभरन्॥

मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु। बृहस्पतिस्तनुतामिमं नो विश्वे देवा इह मादयन्ताम्॥

सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त॥

[[1-5-3-3]]

ऋषयः सप्त धाम प्रियाणि। सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरा पृणस्वा घृतेन॥

पुनरूर्जा नि वर्तस्व पुनरग्न इषाऽऽयुषा। पुनर्नः पाहि विश्वतः॥

सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया। विश्वप्स्निया विश्वतस्परि॥

लेकः सलेकः सुलेकस्ते न आदित्या आज्यं जुषाणा वियन्तु केतः सकेतः सुकेतस्ते न

[[1-5-3-4]]

आदित्या आज्यं जुषाणा वियन्तु विवस्वाꣳ अदितिर्देवजूतिस्ते न आदित्या आज्यं जुषाणा वियन्तु॥

[[1-5-4]]

पूर्वोक्तमन्त्राणां व्याख्यानम्॥ अग्निर्ऋषिः।

[[1-5-4-1]]

भूमिर्भूम्ना द्यौर्वरिणेत्याहाऽऽशिषैवैनमा धत्ते

सर्पा वै जीर्यन्तो ऽमन्यत स एतं कसर्णीरः काद्रवेयो मन्त्रमपश्यत्ततो वै ते जीर्णास्तनूरपाघ्नत

सर्पराज्ञिया ऋग्भिर्गार्हपत्यमा दधाति पुनर्नवमेवैनमजरं कृत्वा अऽऽ धत्ते।

अथो पूतमेव पृथिवीमन्नाद्यं नोपानमत् सैतम्॥

[[1-5-4-2]]

मन्त्रमपश्यत्ततो वै तामन्नाद्यमुपानमत्।

यत् सर्पराज्ञिया ऋग्भिर्गार्हपत्यमादधात्यन्नाद्यस्यावरुद्ध्यै।

अथो अस्यामेवैनं प्रतिष्ठितमा धत्ते

यत् त्वा क्रुद्धः परोवपेत्याहाप ह्नुत एवास्मै तत्

पुनस्त्वोद्दीपयामसीत्याह समिन्द्ध एवैनम्।

यत्ते मन्युपरोप्तस्येत्याह देवताभिरेव॥

[[1-5-4-3]]

एनꣳ संभरति

वि वा एतस्य यज्ञश्छिद्यते यो ऽग्निमुद्वासयते बृहस्पतिवत्यर्चोप तिष्ठते ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैव यज्ञꣳ सं दधाति

विच्छिन्नं यज्ञꣳ समिमं दधात्वित्याह संतत्यै

विश्वे देवा इह मादयन्तामित्याह संतत्यैव यज्ञं देवेभ्यो ऽनु दिशति

सप्त ते अग्ने समिधः सप्त जिह्वाः॥

[[1-5-4-4]]

इत्याह सप्तसप्त वै सप्तधाऽग्नेः प्रियास्तनुवस्ता एवाव रुन्द्धे

पुनरूर्जा सह रय्येत्यभितः पुरोडाशमाहुती जुहोति यजमानमेवोर्जा च रय्या चोभयतः परि गृह्णाति।

आदित्या वा अस्माल्लोकादमुं लोकमायन् ते ऽमुष्मिँल्लोके व्यतृष्यन्त इमं लोकं पुनरभ्यवेत्याग्निमाधायैतान्

होमानजुहवुस्त आर्ध्नुवन्ते सुवर्गं लोकमायन्

यः पराचीनं पुनराधेयादग्निमादधीत स एतान् होमाञ्जुहुयाद्यामेवाऽऽदित्या ऋद्धिमार्ध्नुवन् तामेवर्ध्नोति

[[1-5-5]]

आहवनीयोपस्थानम्॥ अग्निर्ऋषिः।

[[1-5-5-1]]

उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये। आरे अस्मे च शृण्वते॥

अस्य प्रत्नामनु द्युतꣳ शुक्रं दुदुह्रे अह्रयः। पयः सहस्रसामृषिम्॥

अग्निर्मूर्धा दिवः ककुत् पतिः पृथिव्या अयम्। अपाꣳ रेताꣳसि जिन्वति॥

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः। यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभुवं विशेविशे॥

उभा वामिन्द्राग्नी आहुवध्यै॥

[[1-5-5-2]]

उभा राधसः सह मादयध्यै। उभा दातारविषाꣳ रयीणामुभा वाजस्य सातये हुवे वाम्।

अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः। तं जानन्नग्न आ रोहाथा नो वर्धया रयिम्।

अग्न आयूꣳषि पवस आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम्॥

अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम्॥ दधत्पोषꣳ रयिम्॥

[[1-5-5-3]]

मयि॥

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया। आ देवान् वक्षि यक्षि च॥

स नः पावक दीदिवो ऽग्ने देवाꣳ इहा ऽऽवह। उप यज्ञꣳ हविश्च नः॥

अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः। शुची रोचत आहुतः॥

उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते। तव ज्योतीꣳष्यर्चयः॥

आयुर्दा अग्ने ऽस्यायुर्मे॥

[[1-5-5-4]]

देहि वर्चोदा अग्ने ऽसि वर्चो मे देहि तनूपा अग्ने ऽसि तनुवं मे पाहि।

अग्ने यन्मे तनुवा ऊनं तन्म आ पृण।

चित्रावसो स्वस्ति ते पारमशीय।

इन्धानास्त्वा शतꣳ हिमा द्युमन्तः समिधीमहि वयस्वन्तो वयस्कृतं यशस्वन्तो यशस्कृतꣳ सुवीरासो अदाभ्यम्। अग्ने सपत्नदम्भनं वर्षिष्ठे अधि नाके।

सं त्वमग्ने सूर्यस्य वर्चसा

[[1-5-5-5]]

अगथाः समृषीणाꣳ स्तुतेन सं प्रियेण धाम्ना।

त्वमग्ने सूर्यवर्चा असि सं मामायुषा वर्चसा प्रजया सृज॥

[[1-5-6]]

गार्हपत्यस्य पुनरप्याहवनीयस्य चोपस्थानम्॥ अग्निर्ऋषिः।

[[1-5-6-1]]

सं पश्यामि प्रजा अहमिडप्रजसो मानवीः। सर्वा भवन्तु नो गृहे॥

अम्भः स्थाम्भो वो भक्षीय मह स्थ महो वो भक्षीय सहः स्थ सहो वो भक्षीयोर्जः स्थोर्जं वो भक्षीय

रेवती रमध्वमस्मिँल्लोके ऽस्मिन् गोष्ठे ऽस्मिन् क्षये ऽस्मिन् योनाविहैव स्तेतो माऽप गात बह्वीर्मे भूयास्त॥

[[1-5-6-2]]

सꣳहिताऽसि विश्वरूपीरा मोर्जा विशा ऽऽगौपत्येना ऽऽरायस्पोषेण

सहस्रपोषं वः पुष्यासं मयि वो रायः श्रयन्ताम्

उप त्वाऽग्ने दिवेदिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि॥

राजन्तमध्वराणां गोपामृतस्य दीदिविम्। वर्धमानꣳ स्वे दमे॥

स नः पितेव सूनवे ऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये॥

अग्ने॥

[[1-5-6-3]]

त्वं नो अन्तमः। उत त्राता शिवो भव वरूथ्यः। तं त्वा शोचिष्ठ ऽदीदिवः। सुम्नाय नूनमीमहे सखिभ्यः।

वसुरग्निर्वसुश्रवाः। अच्छा नक्षि द्युमत्तमो रयिं दाः॥

ऊर्जा वः पश्याम्यूर्जा मा पश्यत रायस्पोषेण वः पश्यामि रायस्पोषेण मा पश्यत।

इडाः स्थ मधुकृतः स्योना मा ऽऽविशतेरा मदः। सहस्रपोषं वः पुष्यासम्॥

[[1-5-6-4]]

मयि वो रायः श्रयन्ताम्॥

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥

सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजम्॥

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे। उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते॥

परि त्वाऽग्ने पुरं वयं विप्रꣳ सहस्य धीमहि। धृषद्वर्णं दिवेदिवे भेत्तारं भङ्गुरावतः॥

अग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासꣳ सुगृहपतिर्मया त्वं गृहपतिना भूयाः शतꣳ हिमास्तामाशिषमा

शासे तन्तवे ज्योतिष्मतीं तामाशिषमा शासे ऽमुष्मै ज्योतिष्मतीम्॥

[[1-5-7]]

पञ्चमानुवाकोक्तमन्त्राणां व्याख्यानम्।

[[1-5-7-1]]

अयज्ञो वा एष यो ऽसामोपप्रयन्तो अध्वरमित्याह स्तोममेवास्मै युनक्त्युपेत्याह प्रजा वै पशव उपेमं लोकं प्रजामेव

पशूनिमं लोकमुपैति।

अस्य प्रत्नामनु द्युतमित्याह सुवर्गो वै लोकः प्रत्नः सुवर्गमेव लोकꣳ समारोहति।

अग्निर्मूर्धा दिवः ककुदित्याह मूर्धानम्॥

[[1-5-7-2]]

ए॒वैनꣳ॑ समा॒नानां᳚ करो॒त्यथो᳚ देवलो॒कादे॒व म॑नुष्यलो॒के प्रति॑ तिष्ठति।

अ॒यमि॒ह प्र॑थ॒मो धा॑यि धा॒तृभि॒रित्या॑ह॒ मुख्य॑मे॒वैनं॑ करोति।

उ॒भा वा॑मिन्द्राग्नी आहु॒वध्या॒ इत्या॒हौजो॒ बल॑मे॒वाव॑ रुन्द्धे॒।

अ॒यं ते॒ योनि॑र्ऋ॒त्विय॒ इत्या॑ह प॒शवो॒ वै र॒यिः प॒शूने॒वाव॑ रुन्द्धे

ष॒ड्भिरुप॑ तिष्ठते॒ षड्वै॥

[[1-5-7-3]]

ऋ॒तव॑ ऋ॒तुष्वे॒व प्रति॑ तिष्ठति

ष॒ड्भिरुत्त॑राभि॒रुप॑ तिष्ठते॒ द्वाद॑श॒ सं प॑द्यन्ते॒ द्वाद॑श॒ मासा॑ः संवत्स॒रः सं॑वत्स॒र ए॒व प्रति॑ तिष्ठति

यथा॒ वै पु॑रु॒षोऽश्वो॒ गौर्जीर्य॑त्ये॒वम॒ग्निराहि॑तो जीर्यति संवत्स॒रस्य॑ प॒रस्ता॑दाग्निपावमा॒नीभि॒रुप॑ तिष्ठते पुन॑र्न॒वमे॒वैन॑म॒जरं॑

करो॒त्यथो॑ पुना॒त्ये॒व।

उप॑ तिष्ठते॒ योग॑ ए॒वास्यै॒ष उप॑ तिष्ठते॒॥

[[1-5-7-4]]

दम॑ ए॒वास्यै॒ष उप॑ तिष्ठते याच्ञै॒वास्यै॒षोप॑ तिष्ठते॒ यथा॒ पापी॑या॒ञ्छ्रेय॑स आ॒हृत्य॑ न॒मस्य॑ति॑ ता॒दृगे॒व तत्।

आ॒यु॒र्दा अ॑ग्ने॒ऽस्यायु॑र्मे दे॒हीत्या॑हाऽऽयु॒र्दा ह्ये॑ष

व॒र्चो॒दा अ॑ग्ने ऽसि॒ वर्चो॑ मे दे॒हीत्या॑ह वर्चो॒दा ह्ये॑ष

त॒नू॒पा अ॑ग्ने ऽसि त॒नुवं॑ मे पा॒हीत्या॑ह॥

[[1-5-7-5]]

त॒नू॒पा ह्ये॑षः।

अग्ने॒ यन्मे॑ त॒नुवा॑ ऊ॒नं तन्म॒ आ पृ॒णेत्या॑ह॒ यन्मे॑ प्र॒जायै॑ प॒शू॒नामू॒नं तन्म॒ आ पू॑रये॒ति॒ वा॒वैतदा॑ह॒

चित्रा॑वसो स्व॒स्ति ते॑ पा॒रम॑शी॒येत्या॑ह॒ रात्रि॒र्वै चित्रा॑वसु॒रव्यु॑ष्ट्यै वा ए॒तस्यै॑ पु॒रा ब्रा॑ह्म॒णा अ॑भैषु॒र्व्यु॑ष्टिमे॒वाव॑ रुन्द्धे॒।

इन्धा॑नास्त्वा श॒तम्॥

[[1-5-7-6]]

हिमा॒ इत्या॑ह श॒तायु॒ः पुरु॑षः श॒तेन्द्रि॑य॒ आयु॑ष्ये॒वेन्द्रि॒ये प्रति॑ तिष्ठति।

ए॒षा वै सू॒र्मी कर्णे॑कावत्ये॒तया॑ ह स्म॒ वै दे॒वा असु॑राणाꣳ शततर्हाꣳ॑ स्तृꣳ॑हन्ति॒ यदे॒तया॑ स॒मिध॑मा॒दधा॑ति॒

वज्र॑मे॒वैतच्छ॑त॒घ्नीं यज॑मानो॒ भ्रातृ॑व्याय॒ प्र ह॑रति॒ स्तृत्या॒ अछ॑म्बट्कारम्।

सं त्वम॑ग्ने॒ सूर्य॑स्य॒ वर्च॑साऽगथा॒ इत्या॑है॒तत् त्वमसी॒द॒महं

[[1-5-7-8]]

भू॑यास॒मिति॒ वा॒वैतदा॑ह॒

त्वम॑ग्ने॒ सूर्य॑वर्चा अ॒सीत्या॑हा॒शिष॑मे॒वैतामा शा॑स्ते॥

[[1-5-8-1]]

षष्ठानुवाकोक्तमन्त्राणां व्याख्यानम्। अग्निर्ऋषिः।
[[1-5-8-1]]

सं पश्यामि प्रजा अहम्

इत्याह यावन्त एव ग्राम्याः पशवस्तानेवाव रुन्द्धे।

अम्भः स्थाम्भो वो भक्षीय।

इत्याहाम्भो ह्येताः।

महः स्थ महो वो भक्षीय।

इत्याह महो ह्येताः

सहः स्थ सहो वो भक्षीय।

इत्याह सहो ह्येताः।

ऊर्जः स्थोर्जं वो भक्षीय।

इति॥
[[1-5-8-2]]

आहोर्जो ह्येताः।

रेवती रमध्वम्

इत्याह पशवो वै रेवतीः पशूनेवात्मन् रमयते।

इहैव स्तेतो माऽप गात।

इत्याह ध्रुवा एवैना अनपगाः कुरुते।

इष्टकचिद्वा अन्यो ऽग्निः पशुचिदन्यः सꣳहिताऽसि विश्वरूपीः।

इति वत्समभि मृशत्युपैवैनं धत्ते पशुचितमेनं कुरुते

प्र॥
[[1-5-8-3]]

वा एषो ऽस्माँल्लोकाच्च्यवते य आहवनीयमुपतिष्ठते गार्हपत्यमुप तिष्ठते ऽस्मिन्नेव लोके प्रति तिष्ठति।

अथो गार्हपत्यायैव नि ह्नुते

गायत्रीभिरुप तिष्ठते तेजो वै गायत्री तेज एवाऽऽत्मन् धत्ते।

अथो यदेतं तृचमन्वाह संतत्यै

गार्हपत्यं वा अनु द्विपादो वीराः प्र जायन्ते

य एवं विद्वान् द्विपदाभिर्गार्हपत्यमुपतिष्ठते॥
[[1-5-8-4]]

आस्य वीरो जायते।

ऊर्जा वः पश्याम्यूर्जा मा पश्यत।

इत्याहाऽऽशिषमेवैतामा शास्ते

तत्सवितुर्वरेण्यम्

इत्याह प्रसूत्यै

सोमानꣳ स्वरणम्

इत्याह सोमपीथमेवाव रुन्धे

कृणुहि ब्रह्मणस्पते।

इत्याह ब्रह्मवर्चसमेवाव रुन्धे

कदा चन स्तरीरसि।

इत्याह न स्तरीꣳ रात्रिं वसति॥
[[1-5-8-5]]

य एवं विद्वानग्निमुपतिष्ठते

परि त्वाऽग्ने पुरं वयम्

इत्याह परिधिमेवैतम् परि दधात्यस्कन्दाय।

अग्ने गृहपते।

इत्याह यथायजुरेवैतत्।

शतꣳ हिमाः।

इत्याह

शतं त्वा हेमन्तानिन्धिषीय।

इति वावैतदाह

पुत्रस्य नाम गृह्णात्यन्नादमेवैनं करोति

तामाशिषमा शासे तन्तवे ज्योतिष्मतीम्
[[1-5-8-6]]

इति ब्रूयाद्यस्य पुत्रो ऽजातः स्यात् तेजस्व्येवास्य ब्रह्मवर्चसी पुत्रो जायते

तामाशिषमा शासे ऽमुष्मै ज्योतिष्मतीम्

इति ब्रूयाद्यस्य पुत्रो जातः स्यात्

तेज एवास्मिन् ब्रह्मवर्चसं दधाति॥
[[1-5-9]]

पूर्वोक्तोपस्थानस्याग्निहोत्राङ्गता॥ अग्निर्ऋषिः।
[[1-5-9-1]]

अ॒ग्नि॒हो॒त्रं जु॑होति

यदे॒व किं च॒ यज॑मानस्य॒ स्वं तस्यै॒व तत्।

रेतः॑ सिञ्चति प्र॒जन॑ने प्र॒जन॑न॒ꣳ हि वा अ॒ग्निः।

अथौष॑धीर॒न्तग॑ता दहति॒ तास्तत॒ो भूय॑सीः॒ प्र जा॑यन्ते॒

यत् सा॒यं जु॒होति॒ रेत॑ ए॒व तत्सि॑ञ्चति॒

प्रैव प्रा॑त॒स्तने॑न जनयति॒ तत्।

रेतः॑ सि॒क्तं न त्वष्ट्राऽवि॑कृतं॒ प्र जा॑यते याव॒च्छो वै रेत॑सः सि॒क्तस्य॒॥
[[1-5-9-2]]

त्वष्टा॑ रू॒पाणि॑ विक॒रोति॑ ताव॒च्छो वै तत् प्र जा॑यत ए॒ष वै दैव्य॒स्त्वष्टा॒ यो यज॑ते ब॒ह्वीभि॒रुप॑ तिष्ठते॒ रेतस ए॒व सि॒क्तस्य॑

ब॒हु॒शो रू॒पाणि॒ वि क॑रोति॒

स प्रैव जा॑यते॒ श्वःश्वो॒ भूया॑न् भवति॒ य ए॒वं वि॒द्वान॒ग्निमु॑प॒तिष्ठ॑ते।

अह॑र्दे॒वाना॒मासी॒द्रात्रि॒रसु॑राणां॒ ते ऽसु॑रा॒ यद्दे॒वानां॑ वि॒त्तं वेद्य॒मासी॑त् तेन॑ स॒ह॥
[[1-5-9-3]]

रात्रिं॒ प्रावि॑श॒न्

ते दे॒वा ही॒ना अ॑मन्यन्त॒

ते॑ ऽपश्यन्।

आ॒ग्नेयी॒ रात्रि॑रा॒ग्नेयाः॑ प॒शव॑ इ॒मम॒ेवाग्निꣳ स्त॑वाम॒ स नः॑ स्तु॒तः प॒शून् पुन॑र्दा॑स्यतीति॒

ते॑ ऽग्निम॑स्तुवन्त्स ए॑भ्यः स्तु॒तो रात्रि॑या॒ अध्यह॑र॒भि प॒शून् निरा॑र्जत् ते दे॒वाः प॒शून् वि॒त्त्वा कामा॑ꣳ अकु॒र्व॒त

य ए॒वं वि॒द्वान॒ग्निमु॑प॒तिष्ठ॑ते पशु॒मान् भ॑वति॥
[[1-5-9-4]]

आ॒दि॒त्यो वा अ॒स्माँल्लो॒कादमुं॒ लो॒कमै॑त्

सो॑ ऽमुं लो॒कं ग॒त्वा पुन॑रि॒मं लो॒कम॒भ्य॑ध्याय॒त् स इ॒मं लो॒कमा॒गत्य॑ मृ॒त्योर॑बिभेन्मृ॒त्युसं॑युत इ॒व ह्य॑यं लो॒कः

सो॑ ऽमन्यते॒।

अ॒मम॒ेवाग्निꣳ स्त॑वानि॒ स मा॑ स्तु॒तः सु॑व॒र्गं लो॒कं ग॑मयिष्य॒तीति॒

सो॑ ऽग्निम॑स्तौ॒त्स ए॑नꣳ स्तु॒तः सु॑व॒र्गं लो॒कम॑गमय॒त्।

यः॥
[[1-5-9-5]]

ए॒वं वि॒द्वान॒ग्निमु॑प॒तिष्ठ॑ते सुव॒र्गमे॒व लो॒कमे॑ति॒ सर्व॒मायु॑रेति।

अ॒भि वा ए॒षो᳚ ऽग्नी आ रो॑हति॒ य ए॑नावुप॒तिष्ठ॑ते॒ यथा॒ खलु॒ वै श्रेया॑न॒भ्यारू॑ढः का॒मय॑ते॒ तथा॑ करो॒ति

नक्त॒मुप॑ तिष्ठते॒ न प्रा॒तः सꣳ हि नक्तं॑ व्र॒तानि॑ सृ॒ज्यन्ते॑ स॒ह श्रेया॑ꣳश्च॒ पापी॑याꣳश्चासाते॒ ज्योति॒र्वा अ॒ग्निस्तमो॒ रात्रि॒र्यत्॥

[[1-5-9-6]]

नक्त॑मु॒पति॒ष्ठ॑ते॒ ज्योति॑षै॒व तम॑स्तरति।

उ॒प॒स्थेयो॒ ऽग्नी३र्नो॑प॒स्थेया३

इत्या॑हु॒र्म॑नु॒ष्या॑येन्न्वै यो ऽह॑रहरा॒हृत्याथै॑नं॒ याच॑ति॒ स इन्न्वै तमु॒पार्च्छ॑ति।

अथ॒ को दे॒वानह॑रह॒र्या॑चिष्य॒ति।

इति॒ तस्मा॒न्नोप॒स्थेयः॑।

अथो॒ खल्वा॑हुरा॒शिषे॒ वै कं यज॑मानो यजते॒।

इत्ये॒षा खलु॒ वै॥

[[1-5-9-7]]

आहि॑ताग्नेरा॒शीर्यद॒ग्निमु॒पति॒ष्ठ॑ते॒ तस्मा॑दु॒पस्थेयः॑

प्र॒जाप॑तिः प॒शून॑सृजत॒ ते सृ॒ष्टा अ॑होरा॒त्रे प्रावि॑श॒न्

ताञ्छन्दो॑भि॒रन्व॑विन्द॒द्यच्छन्दो॑भिरु॒पति॒ष्ठ॑ते॒ स्वमे॒व तद॒न्वि॑च्छ॒ति

न तत्र॑ जा॒म्य॑स्ति।

इत्या॑हु॒र्यो ऽह॑रहरु॒पति॒ष्ठ॑त॒ इ॒ति

यो वा अ॒ग्निं प्र॒त्यङ्ङु॒पति॒ष्ठ॑ते॒ प्रत्ये॑नमोषति॒ यः परा॒ङ्विष्व॑ङ्ङ्प्र॒जया॑ प॒शुभि॑रेति

कवा॑ति॒र्यङ्ङि॒वोप॑ तिष्ठेत॒ नैनं॑ प्र॒त्योष॑ति॒ न विष्व॑ङ्प्र॒जया॑ प॒शुभि॑रेति॥

[[1-5-10]]

प्रवत्स्यतो यजमानस्याग्नेरुपस्थानमन्त्राः, आचमनम् ,कपालानुमन्त्रणादि च। प्रजापतिर्ऋषिः।

[[1-5-10-1]]

मम॒ नाम॑ प्रथ॒मं जा॑तवेदः पि॒ता मा॒ता च॑ दधतु॒र्यद॑ग्रे॑। तत् त्वं बि॑भृहि॒ पुन॒रा मदै॑तो॒स्तवा॒हं नाम॑ बिभराण्यग्ने॥

मम॒ नाम॒ तव॑ च जातवेदो॒ वास॑सी इव वि॒वसा॑नौ॒ ये चरा॑वः। आयु॑षे॒ त्वं जीव॑से॒ व॒यं य॑थाय॒थं वि परि॑ दधाव॒है॒ पुन॒स्ते॥

नमो॒ ऽग्नये ऽप्र॑तिविद्धा॒य नमो ऽना॑धृष्टा॒य नमः॑ स॒म्राजे॑। अषा॑ढः॥

[[1-5-10-2]]

अ॒ग्निर्बृ॒हद्व॑या वि॒श्वजि॑त् सहन्त्य॒ः श्रेष्ठो॑ गन्ध॒र्वः॥

त्वत्पि॑तारो अग्ने दे॒वास्त्वामा॑हुतय॒स्त्वद्वि॑वाचनाः। सं मामायु॑षा॒ सं गौप॑त्येन॒ सुहि॑ते मा धाः॥

अ॒यम॒ग्निः श्रेष्ठ॑तमो॒ ऽयं भग॑वत्तमो॒ ऽयꣳ स॑हस्र॒सात॑मः। अ॒स्मा अ॑स्तु सुवीर्य॑म्॥

मनो॒ ज्योति॑र्जुषता॒माज्यं॒ विच्छि॑न्नं य॒ज्ञꣳ समि॒मं द॑धातु। या इ॒ष्टा उ॒षसो॑ नि॒म्रुच॑श्च॒ ताः सं द॑धामि ह॒विषा॑ घृ॒तेन॑॥

पय॑स्वती॒रोष॑धयः॥

[[1-5-10-3]]

पयस्वद्वीरुधां पयः। अपां पयसो यत् पयस्तेन मामिन्द्र सꣳ सृज॥

अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्।

अग्निꣳ होतारमिह तꣳ हुवे देवान् यज्ञियानिह यान् हवामहे॥ आ यन्तु देवाः सुमनस्यमाना वियन्तु देवा हविषो मे अस्य

कस्त्वा युनक्ति स त्वा युनक्तु

यानि घर्मे कपालान्युपचिन्वन्ति॥

[[1-5-10-4]]

वेधसः। पूष्णस्तान्यपि व्रत इन्द्रवायू वि मुञ्चताम्॥

अभिन्नो घर्मो जीरदानुर्यत आत्तस्तदगन् पुनः। इध्मो वेदिः परिधयश्च सर्वे यज्ञस्याऽयुरनु सं चरन्ति॥

त्रयस्त्रिꣳशत् तन्तवो ये वितत्निरे इमं यज्ञꣳ स्वधया ददन्ते तेषां छिन्नं प्रत्येतद्दधामि स्वाहा घर्मो देवाꣳ अप्येतु॥

[[1-5-11]]

काम्या याज्यापुरोऽनुवाक्याः॥ विश्वेदेवा ऋषयः।

[[1-5-11-1]]

वैश्वानरो न ऊत्याऽऽ प्र यातु परा वतः। अग्निरुक्थेन वाहसा॥

ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम्। अजस्रं घर्ममीमहे॥

वैश्वानरस्य दꣳसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः। उभा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा॥

पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश। वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा सः॥

[[1-5-11-2]]

रिषः पातु नक्तम्।

जातो यदग्ने भुवना व्यख्यः पशुं न गोपा इर्यः परिज्मा। वैश्वानर ब्रह्मणे विन्द गातुं यूयं पात स्वस्तिभिः सदा नः॥

त्वमग्ने शोचिषा शोशुचान आ रोदसी अपृणा जायमानः। त्वं देवाꣳ अभिशस्तेरमुञ्चो वैश्वानर जातवेदो महित्वा॥

अस्माकमग्ने मघवत्सु धारयानामि क्षत्रमजरꣳ सुवीर्यम्। वयं जयेम शतिनꣳ सहस्रिणं वैश्वानर॥

[[1-5-11-3]]

वाजमग्ने तवो ऽतिभिः॥

वैश्वानरस्य सुमतौ स्याम राजा हिकं भुवनानामभिश्रीः। इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण॥

अव ते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः। क्षयन्नस्मभ्यमसुर प्रचेतो राजन्नेनाꣳसि सिश्रथः कृतानि॥

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय। अथा वयमादित्य॥

[[1-5-11-4]]

व्रते तवानागसो अदितये स्याम॥

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखा करत् प्र ण आयूꣳषि तारिषत्॥

आ द॒धि॒क्राः शव॑सा॒ पञ्च॑ कृ॒ष्टीः सूर्य॑ इव॒ ज्योति॑षा॒ऽपस्त॑तान। स॒ह॒स्र॒साः श॑त॒सा वा॒ज्यर्वा॑ पृ॒णक्तु॑ मध्वा॒ समि॒मा वचा॑ꣳसि॥

अ॒ग्निर्मू॒र्धा

भुवः॑।

मरु॑तो॒ यद्ध॑ वो दि॒वः सु॑म्ना॒यन्तो॒ हवा॑महे। आ तू॒ न॒ः॥

[[1-5-11-5]]

उप॑ गन्तन॥

या व॒ः शर्म॑ शशमा॒नाय॒ सन्ति॑ त्रि॒धातू॑नि दा॒शुषे॑ यच्छ॒ताधि॑। अ॒स्मभ्यं॒ तानि॑ मरुतो॒ वि य॑न्त र॒यिं नो॑ धत्त वृषणः सु॒वीर॑म्

अदि॑तिर्न उरुष्य॒त्वदि॑ति॒ः शर्म॑ यच्छतु। अदि॑तिः पा॒त्वꣳह॑सः॥

म॒हीमू॒ षु मा॒तरꣳ॑ सुव्र॒ताना॑मृ॒तस्य॒ पत्नी॒मव॑से हुवेम। तु॒वि॒क्ष॒त्राम॒जर॑न्तीमुरू॒चीꣳ सु॒शर्मा॑ण॒मदि॑तिꣳ सु॒प्रणी॑तिम्॥

सु॒त्रामा॑णं पृथि॒वीं द्याम॑ने॒हसꣳ॑ सु॒शर्मा॑ण॒मदि॑तिꣳ सु॒प्रणी॑तिम्। दैवीं॒ नावꣳ॑ स्वरि॒त्रामना॑गस॒मस्र॑वन्ती॒मा रु॑हेमा स्व॒स्तये॑॥

इ॒माꣳ सु नाव॒माऽरु॑हꣳ श॒तारि॑त्राꣳ श॒तस्फ्या॑म्। अच्छि॑द्रां पारयि॒ष्णुम्॥

इति प्रथम काण्डे पञ्चमः प्रपाठकः